# .. gAyatrIstotram 3 ..

# ॥ ગાયત્રીસ્તોત્રમ્ 3 ॥

## Document Information

Text title : gAyatrIstotram 3

File name : gAyatrIstotram3.itx

Location : doc_devii

Author : Krishnanandasarasvati

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Description-comments : From Brihatstotraratnakara with 408 stotras

Latest update : June 5, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ ગાયત્રીસ્તોત્રમ્ 3 ॥

શ્રીઃ ।
યસ્મિન્દૃષ્ટે નૈવ દૃશ્યેત વિશ્વં યસ્મિંલબ્ધે નૈવ લબ્ધવ્યશેષઃ ।
યસ્મિન્ જ્ઞાતે નૈવ વેદ્યાન્તરાશા ગાયત્ર્યર્થં પઞ્ચવક્ત્રં પ્રપદ્યે ॥ ૧॥

યા ગાયત્રી નામધેયં મહાર્થં સાર્થં કર્તું સમ્પ્રવિષ્ટોપનાયે ।
માર્ગે મન્ત્રાન્ સર્વતો દર્શયિત્વા તારે લીના સર્વવેદાર્થદીપે ॥ ૨॥

શ્રોતવ્યં મે વાક્યમેતત્સમસ્તૈર્વર્ણૈર્ભાવ્યં સ્વાશ્રમપ્રાપ્તચિહ્નૈઃ ।
તેભ્યસ્તુષ્યેચ્છઙ્કરઃ શ્રીહરિર્વા પ્રષ્ટવ્યો વઃ શ્રીગુરુઃ સ્વૈર્વિનીતૈઃ ॥ ૩॥

ગાયત્રી ચેત્સમ્યગાપ્તા ક્રમેણ સા સઞ્જપ્તા કર્મશુદ્ધયા દ્વિજેન ।
સા વિજ્ઞાતા ગોપિતા સમ્પ્રદાયાત્કિં નો દદ્યાદ્વેદમાતા મતા ચેત્ ॥ ૪॥

બુદ્ધાવીશારોહણં કર્મ તસ્યાઃ સા ચેત્યક્તા ત્યક્ત ઈશો દ્વિજેન ।
યસ્યાં સર્વા દેવતાઃ સમ્પ્રવિષ્ટાઃ સર્વાત્માનં મન્ત્રરાજં પ્રપદ્યે ॥ ૫॥

વિષ્ણુઃ શમ્ભુર્ભાસ્કરો વિઘ્નરાજો યા વા કા વા દેવતાઽસ્યા વિભૂતિઃ ।
સૈકોપાસ્યા વેદમાર્ગૈકનિષ્ઠૈઃ ક્ષીરાબ્ધૌ કિં દુગ્ધભિક્ષાપ્રયાસઃ ॥ ૬॥

નેયં લભ્યા માનુષાણાં ઝષાણાં ગઙ્ગાશબ્દો માનુષત્વૈકહેતુઃ ।
યસ્યા લબ્ધ્યૈ વેદિકાગ્રેસરાણાં વંશે વેદૈઃ સંસ્કૃતે જન્મહેતુઃ ॥ ૭॥

મન્ત્રૈઃ કિં તૈર્યૈઃ પ્રતીક્ષ્યેત દેવી ગાયત્ર્યમ્બા સમ્પ્રવેષ્ટું દ્વિજેષુ ।
દેવૈઃ કિં તૈરગ્નિના પુષ્ટિમદ્ભિસ્તસ્માદ્ભસ્મોદ્ભૂષિતૈઃ સા નિષેવ્યા ॥ ૮॥

દત્તં ભસ્મ શ્રીત્રિપાદામ્બયૈતન્ત્ર્યક્ષૈરગ્નેઃ શેષરૂપં સ્વરૂપમ્ ।
તસ્માદ્ભસ્મ પ્રોચ્યતે ભાસનાચ્ચ ભૂતિર્ગાયત્ર્યમ્બયૈક્યાસ્ત્રિપુણ્ડ્રમ્ ॥ ૯॥

શૈવોઽન્યો વા યાં વિના કિં દ્વિજઃ સ્યાચ્છૈવોઽન્યો વા દીક્ષયા વેદમાતુઃ ।
તસ્માચ્છૈવો વૈષ્ણવોઽન્યેષુ ગણ્યો ગાયત્રાપ્તા બ્રહ્મતા વેદમાન્યા ॥ ૧૦॥

ભેદાપોહવ્યાપૃતિં સા બિભર્તિ ધ્યાનૈર્ભિન્નૈર્ધ્યાનનિષ્ઠૈકવેદ્યામ્ ।
તસ્માન્નામાન્યત્ર સંયાન્તિ સર્વાણ્યસ્યા નિષ્ઠા શામ્ભવી વૈષ્ણવી ચ ॥ ૧૧॥

લોકસ્થાસ્તે વિષ્ણુરુદ્રાદિદેવાઃ કૈશ્ચિત્કામૈઃ કૈશ્ચિદેવાધિકારૈઃ ।
ગાયત્ર્યાસ્તા મૂર્તયઃ સેવનીયા ગાયત્ર્યાં તે સેવિતાઃ સમ્ભ્રમેણ ॥ ૧૨॥

બ્રહ્મત્વં ચેદાપ્તુકામોઽસ્યુપાસ્વ ગાયત્રીં ચેલ્લોકકામોઽન્યદેવમ્ ।
કામો જ્ઞાતઃ સ્વીયપાદપ્રવૃત્યા વાદઃ કો વા તૃપ્તિહીને પ્રવૃત્તિઃ ॥ ૧૩॥

બુદ્ધેઃ સાક્ષી બુદ્ધિગમ્યો જપાદૌ ગાયત્ર્યર્થઃ સોઽનઘો વેદસારઃ ।
તદ્બ્રહ્મૈવ બ્રહ્મતોપાસકસ્યાપ્યેવં મન્ત્રઃ કોઽસ્તિ તન્ત્રે પુરાણે ॥ ૧૪॥

જાત્યશ્વઃ કિં જાતિમાપ્તું સકામો ગત્યભ્યાસાત્સ્પષ્ટતામેતિ જાતિઃ ।
બ્રહ્મત્વાપ્તૌ કઃ પ્રયાસો દ્વિજાનાં યદ્ગાયત્ર્યા વ્યજ્યતે ચાષ્ટમેઽબ્દે ॥ ૧૫॥

બ્રહ્મત્વસ્ય ખ્યાપનાર્થં પ્રવિષ્ટા ગાયત્રીયં તાવતાસ્યદ્વિજત્વમ્ ।
કર્ણદ્વારા બ્રહ્મજન્મપ્રદાનાદુક્તો વેદે બ્રાહ્મણો બ્રહ્મનિષ્ઠઃ ॥ ૧૬॥

એષા નિષ્ઠા દુર્લભા મર્ત્યબુદ્ધૌ તસ્માલ્લોકે વૈષ્ણવાઃ શામ્ભવાશ્ચ ।
ભિન્નં ભિન્નં માર્ગમાસ્થાય વેદં ક્ષામં કુર્વન્ત્યાસ્તિકચ્છદ્મને મે ॥ ૧૭॥

પક્ષિદ્વન્દ્વં વિદ્યતે સ્વસ્વદેહે ભોક્તારં સા ધ્યાનમાચષ્ટ એતત્ ।
યાવત્ક્ષીણા ભોક્તૃતા સ્યાત્તતસ્તુ જ્ઞાત્વા બ્રૂયાદ્બ્રહ્મતાં સ્વસ્ય વિદ્વાન્ ॥ ૧૮॥

ગાયત્ર્યર્થં નો વિજાનાતિ કશ્ચિત્તસ્માદન્યં દેવમાહ દ્વિજોઽપિ ।
વિજ્ઞાતશ્ચેત્સર્વવાદસ્ય શાતિર્મુક્તિર્હસ્તે ગાયમાનસ્ય મન્ત્રમ્ ॥ ૧૯॥

ભસ્માન્તં ચેદ્વિશ્વમેતત્સમસ્તં ભસ્મોદ્ભૂતં ભસ્મ સમ્ભાસતે ચ ।
તસ્માદ્બ્રહ્મ પ્રાહુરાદ્યૈર્વચોભિર્વેદાસ્તસ્માદ્ભસ્મ લિઙ્ગં દ્વિજાનામ્ ॥ ૨૦॥

ઇતિ શ્રીશઙ્કરાચાર્યાભિપ્રાયઃકૃષ્ણભિક્ષુણા ।
વર્ણિતસ્તેન ગાયત્રી વિભૂત્યા સહ નન્દતુ ॥ ૨૧॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યકૃષ્ણાનન્દસરસ્વતીવિરચિતં
ગાયત્રીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Nat Natarajan, NA

.. gAyatrIstotram 3 ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*